# ब्रह्माण्डमण्डलपरिज्ञानम्

**डॉ. रामदेव साहू**
प्रोफेसर एवं विभागाध्यक्ष (वेदविज्ञान)
विश्वगुरुदीप आश्रम शोध संस्थान, जयपुर (राज.)

अस्मादेवाधिदैविकात् मण्डलात् आधिभौतिकमण्डलोत्पत्तिर्जायते। आधिभौतिकमण्डलान्तर्गतान्यपि पञ्च मण्डलानिः अभिमतानि - गुहा, आपः, ज्योति, रसः, अमृतं च। गुहा स्वम्भूः। आपः परमेष्ठी। ज्योतिः सूर्यः। रसः पृथ्वी। अमृतं चन्द्रमा। तत्र गुहा विषये प्रोक्तम् - 'त्रीणि पदानि निहिता गुहास्य' इति। विश्वस्य परिच्छिन्नस्वभाववत्त्वात् विश्वोत्पत्तेः पूर्वं स्वयम्भूशक्तिः गुहारूपतां भजते। उक्तञ्च सायणेन -

**'गूहयति संवृणोति परिच्छिनत्ति परमात्मानमिति गुहा माया।'**[1]

इयं गुहा सृष्टेः पूववर्त्तिनि काले तमसा परिव्याप्तिरूपा। तस्यां गुहायामेव विश्वस्योपादानकारणमेकरूपमेकाकृति च गूढं भवति। उक्तञ्चाथर्ववेदे -

**'वेनस्तत्पश्यत्परमं गुहायद् यत्र विश्वं भवत्येकरूपम्।'**[2]

अर्थात् वेनः हिरण्मयपुरुषः स्वसृष्ट्यनन्तरं तत् परमं ब्रह्म पश्यच्चिन्तितवान् यद् यस्य गुहासृष्टिपूर्ववर्त्ती कालो विद्यते, यस्मिन् काले सर्वस्य विश्वस्य कार्यद्रव्यस्य उपादानकारणं सम्भवति। ततो हिरण्मयाण्डोत्पत्तिः सम्भवति। हिरण्मयाण्डोत्पत्तिः अप्सु सम्भवति। हिरण्मयाण्डोत्पत्तेः पूर्वं या आपः वर्तन्ते ता नास्माकं प्रत्यक्षीभूतं सलिलं भवन्त्यपितु एताः सलिलवन्नामाकृतिधारणक्षमाः परमाणव एव तिष्ठन्ति । सार्धर्म्यात् आप इत्युक्तम्। एता व्यापनशीला भवन्ति। वाष्पवत् सर्वासु दिक्षु विस्तारं लभमानाः पदार्था आपः। आप्नुवन्ति व्याप्नुवन्ति वा यास्ता आपः। अत एवोक्तम्-

**'आपो नारा इति प्रोक्ता आपो वै नरसूनवः।'**

आदौ जलसृष्टौ कापि युक्ति र्न विद्यते। अतएवात्र प्रसरणशीलाः पदार्थाः आपः स्वीकर्त्तव्याः। एते पदार्थाः पुनश्चेतनाः। तेषां चेतनाधिष्ठितत्वं विना गतिरदर्शनात् तेऽवश्यमेव चेतनताधिष्ठिता इत्यभ्युपेयम्। आभ्य एवअब्भ्यो हिरण्मयाण्डोत्पत्तिः। तद्विषये प्रोक्तम्-

**'आपो अग्रे विश्वमायन् गर्भं दधाना अमृता ऋतज्ञाः।**
**यासु देवेष्वधिदेव आसीत्कस्मै देवाय हविषा विधेम ।।'**[3]

स्मृतिकारो मनुरपि - 'अप एव ससर्जादौ तासु वीर्यमवाकिरत्। तदण्डमभवद् हैमम्' इत्युक्त्वा अण्डरूपे विश्वोत्पत्तिमाचष्टे। अस्य हिरण्मयाण्डस्यैव कालान्तरे जगद्रूपे परिवर्तनं भवतीति महाभारतकारो महर्षिर्वेदव्यासोऽप्युल्लिखति महाभारतेऽनुशासनपर्वणि -

**''अण्डजातं तु ब्रह्माणं केचिदिच्छन्त्यपण्डिताः।**
**अण्डाद् भिन्नाद् बभुः शैला दिशोऽम्भः पृथिवी दिवः।।''**[4]

ज्योतिर्मण्डलं सूर्यात्सम्भवति। सौररश्मिसम्पर्कात् सर्वत्र व्याप्तस्य सोमस्य अभिज्वलनान्निष्पन्नः सौरप्रकाशो मण्डलाकारे तस्मिन् हिरण्मयाण्डे सर्वत्र प्रसृतो भवति, स एव ज्योतिरित्युक्तः। उक्तञ्च ऋग्वेदे-

**''आदित्प्रत्नस्य रेतसो, ज्योतिः पश्यन्ति वासरम्।**
**परो यदिध्यते दिवि ।।''**[5]

अत्रोक्तं प्रत्नं रेतः सोम एव। स एव च दिवः सूर्यमण्डलात्परस्तादपि इध्यते दीप्यते। अनेनैव ज्योतिर्मण्डलेनाहोरात्रं सम्भवति। अहोरात्रं ज्योतिषामेव रूपद्वयम् तत्राहः शुक्लं रात्रिः कृष्णं चेति। उक्तञ्च -

**''शुक्रं ते अन्यद् यजतं ते अन्यद् विषुरूपे अहनी द्यौरिवासि।''**
**विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु ।।**[6]

अत्र शुक्रं शुक्लं यजतं कृष्णमिति भाष्ये स्पष्टीकृतम्। कालान्तरे आभ्यामेव शुक्लकृष्णाभ्यां रूपान्तराण्याविर्भूतानि। पदार्थाश्च तान्यादधुः।

पृथ्वीमण्डलं रसः। रसाश्रय इत्यर्थो विज्ञातव्यः। अग्निसोमयोः साहचर्येण रसः पेयजलरूपेण पृथिव्यामेव तिष्ठति, अतएव पृथ्वीमण्डलं रससंज्ञयोक्तम्। तत्राग्निसोमयोरग्नेरेव प्राधान्यम्। नाग्निं विना सोमस्य जलरूपता। अपां गर्भस्थः अग्निरेव पृथिव्या अस्तित्वं रक्षति। अस्य अग्नेः पृथिवीमण्डलीयं महत्त्वमेवमुक्तं यजुर्वेदे-

**''गर्भोअस्योषधीनां गर्भो वनस्पतीनाम्''**
**गर्भो विश्वस्य भूतस्य अग्ने गर्भो अपामसि।।**[7]

ऋग्वेदेऽपि पार्थिवाग्निबलेनैव पदार्थास्तित्वमुक्तम्। तत्र 'अमृत' शब्देनाग्नेरेव संकेतः। तथा चायं मन्त्रः-

**'गर्भो यो अपां गर्भो वनानां, गर्भश्च स्थातां गर्भश्चरथाम्**
**अद्रौ चिदस्मा अन्तर्दुरोणे, विशां न विश्वो अमृतः स्वाधीः।।'**[8]

एवं सर्वे पदार्था ये लोके विद्यन्ते, ते अग्निरूपा एव। अग्निरेव सर्वेषु पदार्थेषु विद्यमानो यज्ञस्य प्रणेता। तद्वशादेव यथा प्रदीपः प्रकाशं प्रसारयति, वृक्षा लताश्च पुष्पफलानि ददति, तथैव पृथिवी अपि अपां रसमजस्रंसम्प्रददते। अत्र पृथिव्यां अन्न-अन्नाद-भाव एव यज्ञः। स च प्राकृतः। प्रकृत्या सम्पद्यते।

यथा चाग्नेर्वैशिष्ट्यं तथैव रसस्यापि वैशिष्ट्यम। तद्यथा पृथिवीमण्डलस्थं जलम् आदित्यरश्मय उर्ध्वमाकर्षन्ति। तेन सहैव जलसंसक्तः पार्थिवोऽग्निरप्यूर्ध्वमाक्रमते। तस्योर्ध्वगतास्याग्नेरुपरितने भागे वायुसम्पर्कात् तज्जलं शुष्कतामापद्यते। अन्ततस्तु प्रवहत्येव रसोऽजस्रम्। जले सोमस्य प्राधान्य मिति विषयेऽप्युक्तम्-

**'त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः।**
**त्वमाततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ।।'**[9]

अमृतं चन्द्रमण्डलम्। परिशुद्धः सोम एवामृतम् । स च चन्द्रमण्डलेऽवस्थितं भवति। अग्निरहितत्वात् सोमस्य स्थितिरत्र पृथिव्यपेक्षया भिन्ना। चन्द्रः सूर्यमण्डलाज्ज्योतिर्गृहीत्वा आप्यायनरूपिणः स्वधर्मस्य प्रतिष्ठापनमात्मनि विदधाति। पश्चात् स्वाश्रितस्याग्निरहितस्य सोमस्य आप्यायनं कृत्वा पृथ्वीमण्डलस्थाः सर्वा ओषधीः आप्याययति। अतएव चन्द्रमा अयं ओषधीपतिरप्युच्यते। ओषधीषु अमृतत्वमस्यैवाप्यायनस्य परिणामः। तेन अन्न-अन्नादयोर्महदुपकारः सम्भवति।

**सन्दर्भाः**

1. (सायणभाष्य/पृ.162)
2. (अथर्व. - 2/2/2)
3. (अथर्व. )
4. (म.भा./अनु.प./23/153/56)
5. (ऋ.8/9/30)
6. (ऋ. 6/58/1)
7. (शु. यजु. 12/37)
8. (ऋ. 1/7/2)
9. (ऋ. 1/6/23)